(569) "छुट छेदने" (VI-तुदादिः-1378. सक. सेट्. पर. कुटादिः।)

छोटकः-टिका, छोटकः-टिका, चुच्छुटिषकः-षिका, चोच्छुटकः-टिका; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुटतिवत् (204) ज्ञेयानि।

(570) "छुड संवरणे" (VI-तुदादिः-1388. सक. सेट्. पर. कुटादिः।)

छोडकः-डिका, छोडकः-डिका, चुच्छुडिषकः-षिका, चोच्छुडकः-डिका; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुटतिवत् (204) ज्ञेयानि। 'स्फुड संवरणे' इत्यस्य पाठभेदोऽयम्।

(571) "छुप स्पर्शे" (VI-तुदादिः-1418. सक. अनि. पर.)

छोपकः-पिका, छोपकः-पिका, चुच्छुप्सकः-प्सिका, [1]चोच्छुपकः-पिका; इत्यादीनि सर्वाण्यपि साधारणरूपाणि दैवादिकक्षिप्यतिवत् (306) ज्ञेयानि। [2]छुपन्-न्ती-ती, इति शतरि रूपम्। [A]छुतम्।

(572) "छुर छेदने" (VI-तुदादिः-1372. सक. सेट्. पर. कुटादिः।

छोरकः-रिका, छोरकः-रिका, चुच्छुरिषकः-षिका, चोच्छुरकः-रिका; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुटतिवत् (204) ज्ञेयानि। [3]छुरिका; [B]छुरितम्।

---

1. 'गुणो यङ्लुकोः' (7-4-82) इत्यभ्यासस्य गुणः। न चात्र प्रथमतः तुकि अभ्यासस्येगन्तत्वाभावात् 'गुणो यङ्लुकोः' (7-4-82) इति गुणो न स्यादिति शङ्क्यम्। परत्वात् गुणे कृते, 'दीर्घात्' (6-1-75) इत्यनेन तुक्प्रवृत्तेः। एवमेवाशङ्क्य, परत्वेन गुणप्रवृत्तिः 'दीर्घोऽकितः' (7-4-83) इत्यत्र भाष्ये साधिता।

2. 'तुदादिभ्यः—' (3-1-77) इति शः विकरणप्रत्ययः। तस्य ङिद्वद्भावादङ्गस्य गुणो न। स्त्रियाम्, 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम्विकल्पः।

3. 'संज्ञायाम्' (3-3-109) इति स्त्रियां भावादौ ण्वुल्।

A. 'रोषच्छुप्तधियाऽथ रोष्टुमभितो योधान् द्विषद्रेशकान्
आलिष्टानजितो जघान धनुषः खण्डेन मर्मस्पृशा।' धा. का. 2. 84.

B. 'सुधाच्छुरितविस्फुटस्मितरुचैव धैर्यं मुटन्
धनुस्त्रुटनतो मनाक् प्रतुटनाय शालामगात्॥' धा. का. 2. 80.